विभुः, त्रि, सर्व्वमूर्त्तसंयोगी । परममहत्त्ववान् । स तु आत्मादिः । यथा,—
"आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्त्तृकम् ।
विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ॥"
इति भाषापरिच्छेदः ॥
विभुरिति विभुत्वं परममहत्त्ववत्त्वम् । इति सिद्धान्तमुक्तावली ॥
"कालखात्मदिशां सर्व्वगतत्वं परमं महत् ।"
इति भाषापरिच्छेदः ॥
दृढः । इत्यजयपालः ॥ व्यापकः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । १० । ४० । ६ ।
"प्रातर्यावाणं विभ्वं विशे विशे ॥"
"विभ्वं विभुं व्यापिनम् ।" इति तद्भाष्ये सायणः ॥
व्याप्तः । यथा, ऋग्वेदे । १ । ३४ । १ ।
"त्रिश्चिन्नो अद्याभवतं न वेद सा
विभुर्व्वायाम उत रातिरश्विना ॥"
"विभुः व्याप्तः ।" इति तद्भाष्ये सायणः ॥
सर्व्वत्र गमनशीलः । यथा, ऋग्वेदे ।१।१६५।१०।
"एकस्य चिन्मे विभ्वस्त्वोजो
या नु दधृष्वान् कृणवै मनीषा ॥"
"विभु सर्व्वत्र गमनशीलम् ।" इति तद्भाष्ये सायणः ॥ ईश्वरः । यथा, ऋग्वेदे । ४ । ७ । १ ।
"यमप्नवानो भृगवो विरुरुचुर्व्वनेषु चित्रं विभ्वं विशे विशे ॥"
"विभ्वं विभुं ईश्वरम् ।" इति तद्भाष्ये सायणः ॥
महान् । यथा, ऋग्वेदे । ५ । ३८ । १ ।
"उरोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ॥"
"विभ्वी महती ।" इति तद्भाष्ये सायणः ॥ )

विभूतिः, स्त्री, ( वि + भू + क्तिन् । ) अणिमादिकमष्टधा । तत्पर्य्यायः । भूतिः २ ऐश्वर्य्यम् ३ । इत्यमरः ॥ ( यथा, ऋग्वेदे । १ । ८ । ६ ।
"एवाहिते विभूतय ऊतय इन्द्र मावते ॥"
"विभूतयः ऐश्वर्य्यविशेषाः ।" इति तद्भाष्ये सायणः ॥ ) शिवभस्म । अस्य शिवस्य अणिमाद्यष्टप्रकारं वैभवं विभूत्यादिपदत्रयं वाच्यं केचित्तु विभूतिर्भूतिरिति द्वयं शम्भुभस्मनि अणिमाद्यष्टके तु ऐश्वर्य्यमित्याहुः । विभवत्यनया विभूतिः क्तिः भवतेः क्तिः भूतिः शिवस्येश्वरस्यान्योपसर्गनिरासार्थं ईश्वरगुणैश्वर्य्यं भावे ष्यञ् अणिमादि लघिमादि । तथा च ।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥"
इति ॥
अणुत्वमणिमा येन सूक्ष्मो भूत्वा विचरति । लघुत्वं लघिमा येन वायुरिव लघुतरो भवति । प्राप्तिरभीप्सितप्राप्तं प्राकाम्यमिच्छानभिघातः । महिमा महत्त्वं येन चतुर्द्दशभुवनान्यन्तोदरे वर्त्तन्ते । ईशित्वं प्रभुता येन स्थावरजङ्गमादिभूतान्यादेशकारीणि भवन्ति । वशित्वं स्वातन्त्र्यं येन स्वतन्त्रश्चरति । कामेन इच्छया अवसायितुं स्थातुं शीलमस्य कामावसायी शोडो यच्छादिलाशिन् तस्य भावः कामावसायिता । सर्व्वानन्दस्तु अनेकार्थत्वाद्धातूनां स्थितिरिह निश्चयार्थः । अवसायी दृश्यमध्य इत्याह । इति भरतः ॥ * ॥ अपि च ।
श्रीभगवानुवाच ।
"परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययम् ।
नित्यानन्दं स्वयं ज्योतिरक्षयं तमसः परम् ।
ऐश्वर्य्यं तस्य यन्नित्यं विभूतिरिति गीयते ॥"
इति कौर्म्मे १ अध्यायः ॥
( लक्ष्मीः । यथा, ऋग्वेदे । १ । ३० । ५ ।
"विभूतिरस्तु सूनृता ।"
"विभूतिर्लक्ष्मीः ।" इति तद्भाष्ये सायणः ॥ विभवहेतुः । यथा, तत्रैव । ६ । २१ । १ ।
"इयर्त्ति विभूतिरीयते वचस्या ॥"
"विभूतिर्जगतो विभवहेतुः ॥" इति तद्भाष्ये सायणः ॥ विविधसृष्टिः । यथा, भागवते । ४ । २४ । ४३ ।
"शक्तित्रयसमेताय मीढुषेऽहंकृतात्मने ।
चेत आकूतिरूपाय नमो वाचोविभूतये ॥"
सम्पत् । यथा, रघुवंशे । ८ । ३६ ।
"अभिभूय विभूतिमार्त्तवीं
मधुगन्धातिशयेन वीरुधाम् ॥")

विभूतिद्वादशी, स्त्री, ( विभूतिवर्द्धिका द्वादशी । ) व्रतविशेषः । यथा,—
नन्दिकेश्वर उवाच ।
"शृणु नारद ! वक्ष्यामि विष्णोर्व्रतमनुत्तमम् ।
विभूतिद्वादशीनाम सर्व्वपापनिषूदनम् ॥
कार्त्तिके चैव वैशाखे मार्गशीर्षेऽथ फाल्गुने ।
आषाढ़े वा दशम्यान्तु शुक्लायां लघुभुङ्नरः ।
कृत्वा सायन्तनीं सन्ध्यां गृह्णीयान्नियमं बुधः ।
एकादश्यां निराहारः समभ्यर्च्य जनार्द्दनम् ।
द्वादश्यां विधिसंयुक्तः करिष्ये भोजनं विभो ।
तदविघ्नेन मे यातु साफल्यं मधुसूदन ॥
ततः प्रभाते चोत्थाय कृतस्नानजपः शुचिः ।
पूजयेत् पुण्डरीकाक्षं शुक्लमाल्यानुलेपनैः ॥
विभूतिदाय नमः पादावशोकाय च जानुनी ।
नमः शिवायेत्यूरू च विश्वमूर्त्तये नमः कटिम् ॥
कन्दर्पाय नमो मेढ्रमादित्याय नमः करौ ।
दामोदरायेत्युदरं वासुदेवाय च स्तनौ ।
माधवायेति हृदयं कण्ठमुत्कण्ठिने नमः ।
श्रीधराय मुखं केशान् केशवायेति नारद ।
पृष्ठं शार्ङ्गधरायेति श्रवणौ च स्वयम्भुवे ॥
स्वनाम्ना शङ्खचक्रासिगदापरशुपाणयः ।
सर्व्वात्मने शिरो ब्रह्मन् नम इत्यभिपूजयेत् ॥
मत्स्यमुत्पलसंयुक्तं हैमं कृत्वा तु शक्तितः ।
उदकुम्भसमायुक्तमग्रतः स्थापयेद्विभोः ॥
गुड़पात्रं तिलैर्युक्तं सितवस्त्राभिवेष्टितम् ।
रात्रौ जागरणं कुर्य्यादितिहासकथादिना ॥
प्रभातायाञ्च शर्व्वर्य्यां ब्राह्मणाय कुटुम्बिने ।
सकाञ्चनोत्पलं देवं सोदकुम्भं निवेदयेत् ॥
यथा न मुच्यसे विष्णोः सदा सर्व्वविभूतिभिः ।
तथा मामुद्धराशेषदुःखसंसारसागरात् ॥
दशावताररूपाणि प्रतिमासं क्रमान्मुने ।
दत्त्वैवं ततो वासमुत्पलेन समन्वितम् ।
दद्यादेवं समा यावत् पाषण्डानभिवर्ज्जयेत् ॥
समाप्यैवं यथाशक्त्या द्वादशद्वादशीर्नरः ।
संवत्सरान्ते लवणपर्व्वतेन समन्विताम् ।
शय्यां दद्यान्मुनिश्रेष्ठ गुरवेऽमरसंयुताम् ॥
ग्रामञ्च शक्तिमान् दद्यात् क्षेत्रमाभरणान्वितम् ।
गुरुं संपूज्य विधिवत् वस्त्रालङ्कारभूषणैः ॥
अन्यानपि यथाशक्त्या भोजयित्वा द्विजोत्तमान्
तर्पयेद्वस्त्रगोदानैरन्यत्र धनसञ्चयात् ॥
अल्पवित्तो यथाशक्त्या स्तोकं स्तोकं समाचरेत् ।
यश्चातिनिःस्वः पुरुषो भक्तिमान् माधवं प्रति ।
पुष्पार्च्चनविधानेन स कुर्य्याद्वत्सरद्वयम् ॥
अनेन विधिना यस्तु विभूतिद्वादशीव्रतम् ।
कुर्य्यात् स पापनिर्म्मुक्तः पितॄणान्तारयेच्छतम् ॥
जन्मनां शतसाहस्रं न शोकफलभाग्भवेत् ।
न च व्याधिर्भवेत्तस्य न दारिद्र्यं न बन्धनम् ॥
वैष्णवो वाथ शैवो वा भवेज्जन्मनि जन्मनि ।
यावद्युगसहस्राणां शतमष्टोत्तरं भवेत् ।
तावत् स्वर्गे वसेद्ब्रह्मन् भूपतिश्च पुनर्भवेत् ॥"
इति मात्स्ये ८२ अध्यायः ॥

विभूषणं, क्ली, ( विशेषेण भूषयत्यनेनेति । वि + भूष + णिच् + ल्युट् । ) आभरणम् । इत्यमरः ॥ ( यथा, कथासरित्सागरे । १७ । ६४ ।
"अस्ति पाटलिपुत्राख्यं पुरं पृथ्वीविभूषणम् ॥")

विभूषा, स्त्री,(वि + भूष भूषणे + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । स्त्रियां टाप् ।) शोभा । इति हेमचन्द्रः ॥ (यथा, कामन्दकीये ।१५।४६।
"ततः प्रबुद्धः शुचिरिद्धदेवः
श्रीमद्विभूषोज्ज्वलितः प्रहृष्टः ॥")
आभरणञ्च ॥ ( यथा, आर्य्यासप्तशत्याम् ।४५८।
"मागण्डगुरुकोपादरुदयितान्येव रोचते मह्यम् ।
काञ्चनमयी विभूषा दाहाञ्चितशुद्धभावेव ॥")

विभूषितः, त्रि, ( वि + भूष + क्तः । यद्वा, विभूषा संजातास्य इति । विभूषा + इतच् । ) अलङ्कृतः । यथा,—
"विशुद्धरत्नानुविभूषिताङ्गी
शिलातले हेममये सुरम्ये ।
सुखोपविष्टं मदनाङ्गनाशनं
जगाद वाक्यं गिरिराजपुत्री ॥"
इति स्कान्दे नीलकण्ठस्तोत्रम् ॥

विभृतः, त्रि, धृतः । पुष्टः । विपूर्व्वभृधातोः क्तप्रत्ययेन निष्पन्नः ॥

वि(बि)भ्रत्, त्रि, ( भृ + शतृ । ) बिभर्त्ति यः । धारणपोषणकर्त्ता । यथा,—
"चतुर्द्दशं नारसिंहं बिभ्रद्दैत्येन्द्रमूर्ज्जितम् ।
ददार करजैरूरावेरकां कटकृद्यथा ॥"
इति श्रीभागवते १ स्कन्धे ३ अध्यायः ॥
अपि च ।
"तरणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः ।"
इत्यादि तन्त्रसारे सरस्वतीध्यानम् ॥
( पवर्गीयबकारादिः साधुरेव ॥ )